# Sundara Kanda Prarthana Shloka

# સુન્દરકાણ્ડ પ્રાર્થના શ્લોકાઃ

## Document Information

Text title : Sundara Kanda Prarthana Shloka

File name : sundarakANDaprArthanAshlokAH.itx

Category : hanumaana

Location : doc_hanumaana

Proofread by : PSA Easwaran

Latest update : May 8, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 8, 2022

*sanskritdocuments.org*

# Sundara Kanda Prarthana Shloka

## સુન્દરકાણ્ડ પ્રાર્થના શ્લોકાઃ

મનોજવં મારુતતુલ્યવેગં
　જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્ ।
વાતાત્મજં વાનરયૂથમુખ્યં
　શ્રીરામદૂતં શિરસા નમામિ ॥ (શરણં પ્રપદ્યે)

અઞ્જનાનન્દનં વીરં જાનકીશોકનાશનમ્ ।
કપીશમક્ષહન્તારં વન્દે લઙ્કાભયઙ્કરમ્ ॥

ગોષ્પદીકૃતવારાશિં મશકીકૃતરાક્ષસમ્ ।
રામાયણમહામાલારત્નં વન્દેઽનિલાત્મજમ્ ॥

યત્ર યત્ર રઘુનાથકીર્તનં તત્ર તત્ર કૃતમસ્તકાઞ્જલિમ્ ।
બાષ્પવારિપરિપૂર્ણલોચનં મારુતિં નમત રાક્ષસાન્તકમ્ ॥

વન્દે વાનર-નારસિંહ-ખગરાટ્-ક્રોડાશ્વવક્ત્રાઞ્ચિતં
　નાનાલઙ્કરણં ત્રિપઞ્ચનયનં દેદીપ્યમાનં રુચામ્ । (દેદિવ્યમાનં)
હસ્તાભૈરસિખેટપુસ્તકસુધાભાણ્ડં કુશાદ્રીન્ હલં (હસ્તબ્જૈરસિખેટ, સુધાકુમ્ભાઙ્કુશાદ્રીન્)
　ખટ્વાઙ્ગં ફણિવૃક્ષધૃદ્દશભુજં સર્વારિગર્વાપહમ્ ॥ (ફણિભૂરુહં)
I bow to hanuman with five faces, Monkey, Man lion,
king of birds (eagle), Boar and Horse, adorne by different
ornaments and flowers. having three eyes in each of the face,
and brightened with light, holding, sword sheild, book, nectar
pot, elephant goad, hill, plough, skull upon a staff, snake,
tree, and destroys the pride of all enemies (negative forces).

સર્વારિષ્ટનિવારકં શુભકરં પિઙ્ગાક્ષમક્ષાપહં
　સીતાન્વેષણતત્પરં કપિવરં કોટીન્દુસૂર્યપ્રભમ્ ।
લઙ્કાદ્વીપભયઙ્કરં સકલદં સુગ્રીવસમ્માનિતં
　દેવેન્દ્રાદિ સમસ્તદેવવિનુતં કાકુત્થદૂતં ભજે ॥

બુદ્ધિર્બલં યશો ધૈર્યં નિર્ભયત્વમરોગતા ।
અજાડ્યં વાક્પટુત્વં ચ હનુમચ્છરણાદ્ભવેત્ ॥ (હનુમત્સ્મરણાદ્ભવેત્)

નમોઽસ્તુરામાય સલક્ષ્મણાય દેવ્યૈ ચ તસ્યૈ જનકાત્મજાયૈ ।
નમોઽસ્તુ રુદ્રેન્દ્રયમાનિલેભ્યો નમોઽસ્તુ ચન્દ્રાર્કમરુદ્ગણેભ્યઃ ॥

જયત્યતિબલો રામો લક્ષ્મણશ્ચ મહાબલઃ ।
રાજા જયતિ સુગ્રીવો રાઘવેણાભિપાલિતઃ ॥

દાસોઽહં કોસલેન્દ્રસ્ય રામસ્યાક્લિષ્ટકર્મણઃ ।
હનુમાન્ શત્રુસૈન્યાનાં નિહન્તા મારુતાત્મજઃ ॥

ન રાવણસહસ્રં મે યુદ્ધે પ્રતિબલં ભવેત્ ।
શિલાભિસ્તુ પ્રહરતઃ પાદપૈશ્ચ સહસ્રશઃ ॥

અર્દયિત્વા પુરીં લઙ્કાં અભિવાદ્ય ચ મૈથિલીમ્ ।
સમૃદ્ધાર્થો ગમિષ્યામિ મિષતાં સર્વરક્ષસામ્ ॥

ધર્માત્મા સત્યસન્ધશ્ચ રામો દાશરથિર્યદિ ।
પૌરુષે ચાપ્રતિદ્વન્દ્વઃ શરૈનં જહિ રાવણિમ્ ॥

સકૃદેવ પ્રપન્નાય તવાસ્મીતિ ચ યાચતે ।
અભયં સર્વભૂતેભ્યઃ દદામ્યેતદ્વ્રતં મમ ॥

ઇતિ સુન્દરકાણ્ડ પ્રાર્થના શ્લોકાઃ સમાપ્તા ।

Proofread by PSA Easwaran

*Sundara Kanda Prarthana Shloka*

pdf was typeset on May 8, 2022

Please send corrections to *sanskrit@cheerful.com*